7. व्याख्यायताम् -

सा तु अतरल-तारकेण क्षुण्णपक्ष्मेणेक्षणेन क्षणं राजमुखमैक्षिष्ट ईक्षमाणेव च स्वेद सलिल सन्दोहैः स्नपितेव महाराष्ट्र-मण्डला-खण्डलाय वाष्पबिन्दु- मौक्तिकावलिमिवोयहरन्ति, श्वास-प्रश्वास-झञ्झावातोड्डीन-धैर्या, शोकाङ्करैरिव रोमनिकरैर्नि-गृहीता भयेवकम्पत।

**चतुर्थ वर्गः** 10

8. संस्कृतसाहित्ये अम्बिकादत्त व्यासस्य स्थानं सम्यकतया विविच्यताम् ।

9. शिवराजविजयस्य वैशिष्ट्यं प्रतिपाद्यताम् ।



A **(Printed Pages 4)**

# AS-2232

## आचार्य (द्वितीय सेमेस्टर) परीक्षा, 2015

## संस्कृतसाहित्यम्

## तृतीयप्रश्नपत्रम्

## शिवराजविजयः)

समयः - घण्टात्रयम् पूर्णांकः - 70

**निर्देश : प्रथमः** प्रश्नोऽनिवार्यः। प्रतिवर्गमेकः प्रश्नोऽवश्यं समाधेयः।

1. अधोलिखितेषु टिप्पणी कार्या - 10×3=30

(क) अम्बिकादत्तव्यासः।

(ख) अम्बिकादत्तव्यासस्य कृतयः।

(ग) शिवराज-विजयस्य नायकः।

(घ) उपन्यासः।

(ङ) शिवराजविजयस्य मङ्गलाचरणम् ।

(च) शिवराज विजयस्य गद्यशैली।

(छ) प्रथम निःश्वास्य कथानकम् ।

(ज) अम्बिकादत्त व्यासस्य समयः।

(झ) गद्यं कवीनां निकषं वदन्ति।

(ञ) शिवराजविजयस्याङ्गी रसः।

## प्रथम वर्गः

2. व्याख्यायताम् - 10

'' अहो! चिररात्राय सुप्तोऽहम्, स्वप्नजालपरतन्त्रेणैव महान् पुण्यमयः समयोऽतिवाहितः, सन्ध्योपासन-समयो-ऽयमस्मद् गुरूचरणानाम्, तत् सपदि अविचिनोमि कुसुमानि'' इति चिन्तयन् कदलीदलमेकमाकुञ्च्य, तृणशकलैः सन्धाय, पुटकं विधाय, पुष्पावचयं कर्त्तुमारेभे।

3. व्याख्या कार्या-

अरूण एष प्रकाशः पूर्वस्यां भगवतो मरीचिमालिनः। एष भगवान मणिराकाशमण्डलस्य, चक्रवर्ती खेचर-चक्रस्य, कुण्डलभाखण्डलदिशः, दीपको ब्रह्माण्ड भाण्डस्य, प्रेयान् पुण्डरीकपटलस्य, शोक विमोकः कोक लोकस्य, अवलम्बो रोलम्बकदम्बस्य, सूत्रधारः सर्वव्यवहारस्य, इनश्च दिनस्य। अयमेव अहोरात्रं जनयति, अयमेव वत्सरं द्वादशसु भागेषु विभनक्ति,.... धन्य एष कुलमूलं श्रीरामचन्द्रस्य, प्रणम्य एष विश्वेषालि'' ति उदेष्यन्तम् भास्वन्तं प्रणमन् निज पर्णकुटीरात् निश्चक्राम कश्चित् गुरूसेवनपटुर्विप्रवटुः।





## द्वितीय वर्ग :

4. व्याख्यायताम् - 10

''कोऽयं, कुतोऽयं, चरो वा संदेशहरोवा, कपटपथिको वा, अस्मत्पक्षपाती वा, शत्रुपदातिर्वा, कोऽप्युभयपक्षो दासीनो वेति सद्य एवं विज्ञेयं'' इति विचारयन्, मन्दिर-पाश्चात्य-प्राचीर-गवाक्षादायान्तं कञ्चिदस्पष्टालाप-ध्वनिमश्रौषीत्।

5. व्याख्या कार्या-

यशस्विसिंहस्तु तदाकर्ण्य स्थगित इव चकित इव छीत इव अवहेलित इव आक्षित्त इव क्षणमधः क्षणं पुरः क्षणं त्रिवलीमण्डिते महादेवललाटे क्षणं च नासाग्रे दत्तदृष्टिः अवागिव स्तब्धवागिव मन्त्रित इव च तुष्णीमेव तस्थौ।

## तृतीय वर्ग :

6. व्याख्या कार्या - 10

ऋतुरेष शरत् । साम्प्रतम् पुण्यनगरप्रान्तेऽकालेऽपि वसन्त इव पुंस्कोकिलाः काकलीकलकलैर्दिगन्तं बधरयन्ति। मिलित-मलयानिललोला लवङ्ग-लता दोलन्ति। मधुगन्धान्ध-मधुव्रत-व्रात-विधुता भाकन्दमञ्जर्यो माञ्जुल्यं वमन्ति। नितान्त विरह क्लान्त-परमश्रान्त-शून्य-स्वान्त-कान्ताजनज्वाला जटाल-दाव-ज्वलन-जाज्वल्यमानाङ्गारक-कदम्व-मिव पाटलपटलमुल्लसति।